


## अथ बृहस्पति स्तोत्रं [श्रीधर्मोत्तर पुराणे]

श्री भगवानुवाच॥ बृहस्पस्सुराचार्यो दयावान् शुभलक्षणः। लोकत्रयगुरुः श्रीमान् सर्वज्ञ सर्वगोविभुः॥ सर्वेश सर्वाभीष्टः सर्वजित्सर्व पूजितः। अक्रोधनो मुनिश्रेष्ठो नीतिकर्ता गुरुः पिता॥ विश्वात्मा विश्वकर्ता च विश्वयोनिर्योनिजः। भूर्भुवस्सुवरंचैव भर्ताचैव महाबलः। पंचविंशति नामानि पुण्यानि नियतात्मना॥ नंदगोप ग्रहासीन विष्णुना कीर्तितानि वै। प्रातुरुत्थाय पठितावर्तयेत्सु समाहितः॥ विपरीतोपि भगवान् प्रीतस्तस्य बृहस्पतिः। यः श्रुणोति गुरुस्गोत्रं चिरंजीवि न संशयः॥ गोसहस्रफलं तस्य विष्णोर्वचनम् अब्रवीत् बृहस्पतिकृता पीडा कदाचिद्भविष्यति। इति श्रीधर्मोत्तर पुराणे बृहस्पति स्तोत्रं॥

## अथ बृहस्पति स्तोत्रं [श्रीस्कंद पुराणे]

अस्य श्रीबृहस्पतिस्तोत्रस्य गृत्समद ऋषिः। अनुष्टुप्छन्दः। बृहस्पतिर्देवता। बृहस्पतिप्रीत्यर्थं जपे विनियोगः॥ गुरुर्बृहस्पतिर्जीवः सुराचार्यो विदांवरः। वागीशो धिषण्णो दीर्घश्मश्रुः पीताम्बरो युवा॥ सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारकः। दयाकरः सौम्यमूर्तिः सुरार्च्यः कुड्मलध्युतिः॥ लोकपूज्यो लोकगुरुर्नीतिज्ञो नीतिकारकः। तारापतिश्च अङ्गीरसो देववैध्यपितामहः॥ भक्त्या बृहस्पतिंस्मृत्वा नामान्येतानि यः पठेत्। निरोगि बलवान् श्रीमान् पुत्रवान् सः भवेन्नरः॥ जीवेद्वर्षशतं मर्त्यो सर्वाः पापं नश्यति। यः पूजयेद्गुरुदिने पीतगन्धाक्षतांबरैः॥ पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम्। ब्रह्मणान्भोजयित्वा च पीडाशान्तिर्भवेद्गुरोः॥ इति श्रीस्कंद पुराणे बृहस्पतिस्तोत्रं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com